International Journal of Sanskrit Research 2023; 9(2): 118-121

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 118-121
© 2023 IJSR
www.anantaajournal.com
Received: 06-01-2023
Accepted: 10-02-2023

**Pabitro Barman**
Research Scholar, Jawaharlal Nehru University, New Delhi, India

**Corresponding Author:**
**Pabitro Barman**
Research Scholar, Jawaharlal Nehru University, New Delhi, India

# आधुनिकसंस्कृतसाहित्ये उपन्यासविधायाः स्वरुपविकासश्च

**Pabitro Barman**

**सारांश**
अनेके विद्वांसः स्पष्टं कृतवन्तः यत् ये उपन्यासं काल्पनिक-लोकप्रियंरुपं मन्यन्ते ते पाश्चात्यसाहित्यस्य उत्पाद्य इति मन्यन्ते ते सर्वथा भ्रमान्माकाः सन्ति। यथा भारते प्राचीनतमाः कथास्रोताः(पञ्चतन्त्रादयः) आविष्कृताः, तथैव उपन्यासविधायाः अस्तित्वमपि भारते एकेण रुपेण वा प्रायः सहस्रवर्षेभ्यः उपलभ्यते। सुवन्ध्वाचार्यस्य 'वासवदत्ता।' , वाणभट्टस्य 'कादम्बरी' च तत्वतः उपन्यासाः न सन्ति किम्? सम्भवति यत् अद्यतनस्य उपन्यासस्य केचन् तथाकथिताः तत्त्वानि (यथा कथ्यवस्तु, पात्राणि चरित्रचित्रणं च, कथनम्, देशकालः परिवेशः च, प्रयोजनं वा सन्देशः) शैली इत्यादयः वस्तुतः उपन्यासाः यस्मिन् रुपेण वर्तमानाः सन्ति तस्मिन् रुपेण न वर्तन्ते वयं तान् प्राप्नुमः, परन्तु विधायाः दृष्ट्या जीवनस्य समग्रतायाः आख्यानात्मकं चित्रणं यस्मिन् विशालफलके एते उपन्यासाः घटिताः,तत्र तस्मिन् एव उपन्यासस्य तत्त्वं तस्य तत्त्वरुपेण भवति। नाट्यशास्त्रे उपन्यासशब्दस्य प्रयोगः नाट्यसन्धेः उपभेदरुपेण भवति, यस्या परिभाषा "उपन्यासः प्रसादनम्" अथवा "उपपक्तिकृतौ ह्यर्थ उपन्यासः प्रकीर्तितः" इति।

**कूटशब्द** : नवीनकरणम्, आधुनिकता, नवशब्दानां प्रयोगः, उपन्यासविधाः, उपन्यासविकासः।

## प्रस्तावना

संस्कृतसाहित्यशास्त्रेषु विविधानि काव्यविधानि उपलभ्यन्ते। तेषु खलु मद्यकाव्यमन्यतमम्। गद्यकाव्यस्य पञ्चभेदेषु कथाख्यायिका च अन्यतमा। कालचक्रे गद्यकाव्यादेव विवर्तनं भूत्वा उपन्यासस्योत्पत्तिः जायते। उपन्यासः खलु कथाख्यायिकाभ्यां स्वतन्त्ररूपेण विराजते, यतः कथाख्यायिकाभ्यां तस्य वैलक्षणं दृश्यते। पुराकाले संस्कृतकवेर्सृष्टिषु उपन्यासस्योल्लेखमपि नोपलभ्यते, इदानीन्तनः काले तु आधुनिककवयः संस्कृतसाहित्ये उपन्यासं रचयित्वा संस्कृतसाहित्यभाण्डारं समृद्धं कृतवन्तः। गुजराटी इत्यादिभाषाभिः पर्यायवाचीनां आधारेण 'नवलकथा' इति पदस्य अभिधानं कृतम्, मराठी इत्यादीनां भाषाणां भारतीयपरम्परायाम् उपरि बलं दत्त्वा 'कादम्बरी' इति वक्तुमारब्धम्। माराठीभाषायां उपन्यासाः कादम्बरी इति नाम्ना प्रसिद्धाः सन्ति। संस्कृतसाहित्यविहाय बङ्गाली-हिन्दी-मराठी-ओडिया-तामिल-तेलेगु इत्यादिषु भाषाषु अपि उपन्यासं परिदृश्यन्ते। यथा – वङ्कीमचन्द्रचट्टोपाध्यायकृतः 'कपालकुण्डला', 'देवीचौधुराणी' च, विभूतिभूषणवन्धोपाध्यायकृतः 'आरण्यकः', शरत्वन्द्रचट्टोपाध्यायकृतः 'देवदासः', प्रेमचन्दकृतः 'सेवासदनम्' 'रङ्गभूमि' च, डाँ शरदसिंहकृतः 'शिखण्डी', शैलजाराजकृत 'कोषः', शकुन्तलागोगटेकृतः 'मन का रङ्गः', नयनाचार्येण 'शार्टकटम्', गोकुलशेषाद्रिकृतः 'राजकेसरी' 'चेरार कोट्टई' चादि।

### आधुनिकसंस्कृतसाहित्ये उपन्यासः

1. अम्विकादत्तव्यासमविरचितः शिवराजविजयम्।
2. भट्ट मथुरानाथशास्त्रीविरचितः आदर्शरमणी(1905), भक्तिभावना भगवान्, मानसिंह (1958)।
3. केशवचन्द्रदाशविरचितः तिलोतत्तमा,पताका।
4. कृष्णशर्माचितलेविरचितः लोकमान्यतिलकचरितम्।
5. प्रेमशङ्करमिश्रविरचितः सुभाषचरितम्।
6. आचार्यनारायणशास्त्रीख्रिस्तेविरचितः दारिद्राणां हृदयम्, दिव्यदृष्टिः।
7. वाचस्पति ओगेटिपरीक्षित् शर्मा विरचितः कालाय तस्मै नमः (1999)।

8. राधावल्लभत्रिपाठीविरचितः विक्रमचरितम् (2000), अन्यच्च (2011), ताण्डवम् (2013)।
9. विधुशेखरभट्टाचार्यशास्त्रीविरचितः जयपराजयम्, चन्द्रप्रभा।
10. हरिदाससिद्धांतवागीशविरचितः सरला (1953)।
11. श्रीनिवासशास्त्रीविरचितः चन्द्रमहीपतिः (1960), सूर्यप्रभा, वैभवपिशाचः।
12. मेधाव्रतशास्त्रीविरचितः कुमुदिनीचन्द्र (1919-1920)
13. रामजी उपाध्यायविरचितः द्वा-सुपर्णा(1962), सत्यहरिश्चन्द्रोदयम् (1989)।
14. कालनाथशास्त्रीविरचितः संस्कृतोपासिकाया आत्मकथा (1987), जीवनस्य पाथेयम्।
15. हरिनारायणदीक्षितविरचितः गोपालवन्धुः (1988)।
16. गणेशरामशर्माविरचितः जीवतोऽपि प्रेतभोजनम्, मामकीनो जीवनसंघर्षः, मूढ़चिकित्सा।
17. रामकरणशर्माविरचितः सीमा (1987), रयीशः (1994), सुधर्मा (2008)।
18. श्रीवृद्धिचन्द्रशर्मा(शास्त्री)विरचितः आदर्श दम्पति।
19. शङ्कलालशर्माविरचितः शशिप्रभा।
20. श्रीनाथहसूरकरविरचितः अजातशत्रु (1984), सिन्धुकन्या (1982), प्रतिज्ञापूर्तिः (1983), दावानलः (1991), चेन्नमा, व्रती।
21. भट्टरमानाथशास्त्रीविरचितः दुःखिनीवाला।
22. डः विश्वनारायणशास्त्रीविरचितः अविनाशि (1994)।
23. केशवचन्द्रविरचितः शीतलतृष्णा (1983), तिलोत्तमा (1983), शिक्षा (1984), मधुयानम् (1984), पताका (1985), प्रतिपद् (1985), अरुणा (1985), आवर्त्तम् (1985), निकषा (1986), ऋतम् (1988), अञ्जलिः (1990), विसर्गः, शशिरेखा (1994), ओँ शान्तिः।
24. नारायणदाशविरचितः वह्नवलय (2002) ,ऊर्मिला।
25. जग्गूवकुलभूषणविरचितः जयन्तिका।

**उपन्यासस्य स्वरुपविकासश्च** - उपन्यासः खलु स्वतन्त्रसृष्टिः, गद्यरुपेण तस्य निर्माणं दृश्यते। किन्तु कथाख्यायिकारुपे गद्यकाव्यस्य अस्तित्वं पूर्वादेव प्रसिद्ध्यते, ततः उपन्यासस्य स्वतन्त्रं कथं सम्भवति? वस्तुतः उपन्यासस्य स्वतन्त्रं प्रतिष्ठायः। तत्र कथाख्यिकाभ्यां विविधानि भेदकतत्त्वानि उपलभ्यन्ते। तेभिः तत्त्वेभिः उपन्यासस्य वैलक्षणं दृश्यते।

**कथाख्यायिकायाः लक्षणं तु –**

"प्रकृतानुकूलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता।।
वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्।
वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च।।
कवेरभिप्रायकृतैः कथनैः कश्चिदङ्किता।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता।।
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।
संस्कृते संस्कृता चेष्टा कथापभ्रंशभाक् तथा।।
अन्यैः स्वरचितं तस्यां नायकेन तु नोच्यते।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः।।" (भामहकाव्यलंकारः – २५-२९)

अर्थात् आख्यायिकायाः विषयः भवति लोकप्रसिद्धवृत्तान्तम्। तत्र नायकः स्वयम् आख्यानभागस्य वक्ता। आख्यायिकाः मनोरमगद्ये करणीयम्। तत्र परिच्छेदस्य अध्यायस्य वा उच्छ्वासः नाम भवति। तत्र च आख्यायिकायां वक्त्रेन-अपरवक्त्रेन च छन्दसा भविष्यत् घटनाप्रवाहस्य सूचना दृश्यते। कविकल्पनायाः च अवकाशं तत्र दृश्यते। कन्याहरणम्, युद्ध,विरह,नायकस्य अभ्युदयः वर्णना अख्यायिकायां दृश्यते। आख्यायिकायां भाषा भवति संस्कृतम्। कथा काव्ये च संस्कृतं प्राकृतञ्च कापि भाषा भवति। तत्र नायकः आख्यानभागस्य वक्तारूपेण न गृह्यते। आलङ्कारिकाचार्यविश्वनाथेनापि कथा-आख्यायिकायाः लक्षणं निरूप्यते-

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।
क्वचिदत्र भवेदार्या क्वचित् वक्तापरवक्त्रके।
आदो पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम्।।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित्।
कथांशानां व्यवच्छेदः आश्वाश इति वध्यते।।
आर्यावक्त्रापरवक्त्राणां छन्दसा केनचित्।
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्।।" (साहित्यदर्पणम्-६/३१०-३११)

आधुनिककविनाभिराजराजेन्द्रमिश्रेण उपन्यासस्य लक्षणं निरूप्यते-

"कथाऽऽख्यायिकयोः कश्चिन्मिश्रभेदोऽपि साप्रतम्।
उपन्यास इति ख्यातो भाषान्तरप्रतिष्ठितः।।
कालखण्डविशेषस्य समग्रं जनजीवनम्।
प्रतिविम्ब इवादर्शे न्यस्यतेऽत्र सविस्तरम्।।
क्वचित्सामाजिकी क्रान्तिः सर्वोदयसमर्थिनी।
रूढिपाखण्डविध्वंसोनवाचारः क्वचित्पुनः।।
महाकाव्यवदेवायमुपन्यासोऽपि वस्तुतः।
साङ्गपाङ्गं समग्रञ्च नेतृजीवनचित्रणम्।।
धर्मराजनयार्थानां नैव वृत्तं हि तादृशम्।
यदुपन्यासनिर्माणे नोपयोज्यं भवेत्पुनः।।
विविधाः सन्त्युपन्यासाः इतिवृत्तान्तानुरोधेतः।
**कथाप्रस्तुतिभेदाच्च कविप्रतिभयाञ्चिताः।।"**
(अभिराजयशोभूषणम्,१०५-११०)

अर्थात् उपन्यासः खलु स्वातन्त्रसृष्टिः, तत्र कापि शङ्का न जायते। चरित्रचित्रणे कथावस्तुटना संलापेनभाषावैचित्रेण चोपन्यासस्य स्वातन्त्र्यं दृश्यते। आधुनिसंस्कृतोपन्यासेषु एतेषां तत्त्वानां प्रतिफलनं निन्मरूपेण प्रतिविम्बते।

**शिवराजविजयम्** - शिवराजविजयम् इति उपन्यसस्य कथावस्तुः इतिहासप्रसिद्घः महाराष्ट्रशिरमणेः शिवाजीराज्ञः जीवनचरितम् एव अस्य उपन्यसस्य उपजीव्यम्। अस्मिन् उपन्यासे मातृभूमिं प्रति देशमातरं प्रति वा देशप्रेमः दरीदृश्यते, प्रजावात्सल्यता, राजभक्तिः, धर्मपरायणता, राष्ट्रीयभावना च आधुनिकदृष्टा प्रतिस्थप्यते अम्बिकादत्तव्यासेन। अस्य उपन्यासस्य गौरववर्धितुम् उच्यते यत् –

**"अस्मिन्नेव भारतवर्षे यायजूकैः राजसूयादियज्ञाः व्ययाजिषत। कदाचिदिहैव वर्षावातातपहिमसहानि तपांसि स्थापिताः।।"**
(शिवराजविजयम्, प्रथमनिश्वासः)

शिवराजविजय उपन्यासस्य कथावस्तु पाश्चात्यपौरस्त्ययोः शिल्प समन्वयः एवं। अत्र काव्यधारायाः स्वातन्त्र्यं प्रवाहद्वयेन प्रवहति अम्बिकादत्तस्य कविकल्पना इतिहासश्च, तयोः संमिश्रनं अपि सम्यक् रूपेण अम्बिकादत्तव्यासेन कृतम्।
शिवराजविजयस्य भाषाशैली अत्यन्तं चित्ताकर्षकम्। अत्र मधुरपदविन्यासेन इतिहासस्य घटनाः प्रवाहःजीवन्तरुपेण निमिर्ती।समासवद्धपदानाम् अप्राचुर्यहेतुत्वं उपन्यासस्य सौन्दर्यं सम्यकरुपेण दृश्यते।अत्र च ओजप्रसादमाधुर्यगुणानां सन्निवेशमपि सम्यकरुपेण प्रतिफलति।

कवेः वर्णनाकौशलम् अत्यन्तम् अद्भुतं सुन्दरं च मनोग्राही। कदम्वरीकथाकाव्यस्य कथावस्तु यथा रोचतेतथा हि शिवराजविजयम् उपन्यासस्य कथा सर्वेभ्यः रोचन्ते। अत्र कुत्रापि महाराष्ट्रशिविरं कुर्तापिमुखलपरिवारस्य चित्रं कुत्रापि सैन्यसज्जा कुत्रापि च हास्य विषयस्य वर्णना परिदृश्यन्ते।

प्रकृतेः अपूर्वसौन्दर्यं शिवराजविजये अपि अम्विकादत्तव्यासेन सुक्ष्मरूपेण उपस्थापते– "कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रपानीयं,परस्सहस्त्रपुण्डरीकपटलपरिलसितं पतगिकुलकुजितपुजितं पयः पुरितं सह आसीत्। दक्षिणतश्चैको निर्झरझर्झरध्वनितदिगन्तरः फलपटलास्वादचपलितचञ्चुपतङ्ग-कुलाक्रमणाऽऽधिकविनतशाखशाखिसमूलव्याप्तः सुन्दरकन्दरः पर्वतखण्ड आसीत्।" (शिवराजविजयम्, प्रथमनिश्वासः)

शिवराजविजये सामाजिकचित्र वर्णयितुं अम्विकादत्तव्यासाचायेण हिन्दुसम्प्रदायस्य दीनता मुसलमानस्य अत्याचारः दमनकारिप्रवृत्तिश्च वर्णते।मुसलमानयुवकेन ब्राह्मणः कन्याः अपहरणं मुसलमानसम्प्रदायस्य चरमत्याचारस्य दृष्टान्तः – "अद्य हि वेदा विच्छिद्य वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित्तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद्धनानि लुण्ठ्यन्ते, क्वचित् आर्तनादः, क्वचिद् रुधिरधाराः, क्वचिद् अग्निदाहः, क्वचिद् गृहनिपातः, इत्यादि।" (शिवराजविजयम्, प्रथमनिश्वासः)

अपरः एकः उपन्यासः प्रो. रामजी उपाध्याय विरचितः "द्वा-सुपर्णा" इति। तत्रापि च उपन्यासस्य सर्वेषां तत्त्वानां समन्वयः दृश्यते। अस्मिन् उपन्यासे श्रीकृष्ण मित्र सुदामायाः दारिद्रता, तस्य दारिद्रहेतुत्वात् पत्न्यानुरोधेन श्रीकृष्ण समीपे गत्वा अर्थलाभस्य वर्णना दृश्यते। तत्र एकेन वाक्येन ही ग्रन्थसार ज्ञायते – "तस्य ( सुदाम्नः) दारिद्रयं तु मयापहरणीयमेव।" (द्वा-सुपर्णा)

द्वा-सुपर्णा इति उपन्यासस्य शैली प्रसादगुणयुक्त। अत्र सरलसमासवद्धपदानां प्रयोगः सर्वत्र दृश्यते। अलंकाराणामपि अलंकरणे न्युनता नोपलभ्यते – "नाहं गृह्णामि काकिणीमपि श्वशुरात्। " (द्वा-सुपर्णा)

अस्मिन् उपन्यासे वक्रक्तेः अपि प्रयोगं दृश्यते। तत्र प्रकरणवक्रतायाः आधिक्यं परिलक्ष्यते – "एतेषां सर्वेषां लोकानां कल्याणं विदधतो यूयं तेभ्यो लोकेभ्यः परमानन्दस्य औयुदयस्य च प्राप्तिं कुरुत ।" (द्वा-सुपर्णा)

**आदर्शरमणी** – भट्टमथुरानाथशास्त्रीकृतः 'आदर्शरमणी' नाम एकसामाजिकोपन्यासः अस्ति। सः वङ्गकविः शरत्चन्द्रचट्टोपाध्यायेण प्रभावितः। श्रूयते यत् लेखकः मथुरानाथः वङ्गाः उपन्यसः पणरक्षा' उपन्यासेन प्रभावितः 'आदर्शरमणी' संस्कृतेन रचितवान्। अत्र कोऽपि आदर्शवादीयुवकः धनं विना युवतीं विवाहं कृत्वा आदर्शान् स्थापयति। अस्मिन् उपन्यासे आदर्शस्त्रीजीवनं, तस्याः त्यागाः, विनयः, स्त्रियाः गौरवं च लेखकेन सुन्दरं चित्रितमस्ति। रचनायां प्रतिज्ञायाः केचन् दृष्टान्तः –

इयं वालिका यथा पैतृकसम्पत्तेः स्यादधिकारिणी तथैव प्राणपणात्प्रयतिष्य इति। (आदर्शरमणी)

यथैव यौष्माकीणां सम्पत्तिं यौष्माकी कन्या लप्स्यते ।(आदर्शरमणी)

तथैवाऽप्राणपातं यतिष्ये। धर्मः साक्षी, श्रीगुरुश्च साक्षी ।(आदर्शरमणी)

**संस्कृतोपासिकाया आत्मकथा** – कलानाथशास्त्रीकृतः आत्मकथात्मकशैल्याः विरचितः उपन्यासः अस्ति संस्कृतोपासिकाया आत्मकथा ।एकः वालिकासंस्कृतपाठिका आत्मकथनशैल्या किशोरावस्थातः प्रौढावस्थापर्यन्तं मनोरञ्जकं विवरणं ददाति ।अस्य उपन्यासस्य आरम्भे एकः संस्कृतपाठरता नारी संस्कृतयुवकशिक्षकस्य प्रेम्णि पतति ।युवकः नगरात् निर्गत्य IAS परीक्षां उत्तीर्ण्य प्रशासनिककार्यार्थं नगरम् आगम्य पूर्वसंस्कृतवालिकाछात्र्या सह विवाहम् अकरोत् इति उपन्यासस्य विषयः ।युवति स्वस्य पूर्वस्मृतीनां स्मरणं कृत्वा स्वस्य प्रेम्णः कथयति इति उपन्यासस्य विषयः।

**कुमुदिनीचन्द्रः** – मेधाव्रतशास्त्रीकृतः 'कुमुदिनीचन्द्र' उपन्यासः १९१९-१९२० मध्ये कदाचित् लिखितवान्। अस्य ग्रन्थस्य नायकः चन्द्रसिंहः नायिकाकुमुदिनी च। उपन्यासस्य नामकरणं नायकनायिकानाम्ना आश्रितम् अस्ति। अस्य उपन्यासस्य नायकः चन्द्रसिंहः अजीतगढ़स्य राजा केशरीसिंहस्य पुत्र तथा च नायिका कुमुदिनी विजयनगरराज्यस्य राजा विजयसिंहस्य पुत्री अस्ति। अस्य उपन्यासस्य घटना ऐतिहासिक अस्ति। 'कुमुदिनीचन्द्र' उपन्यासे प्रेम्ना उत्कण्ठायुक्तं मायावी घटनासंग्रहं अपि दृश्यते। निर्मितः अस्ति। राजधर्मराजनीतिविषयकम् अयं उपन्यासः अस्ति। सत्तायाः साधने जनाः कियत् क्रूराः भवितुमर्हन्ति इति कुरसिंहः तथा तस्य समूहाः च प्रमाणमस्ति।

**उपसंहारः** – आधुनिकसंस्कृतसाहित्ये नूतनकाव्यधारासु उपन्यासरेकः गुरुत्वपूर्णः सृष्टिः किन्तु न तु सम्पूर्णरुपेण नूतनम्। नाट्यशास्त्रे अस्य उपन्यासस्य उल्लेखं दृश्यते, तत्रोपन्यसः नाट्यसन्धेरङ्गरुपेण दृश्यते ।किन्तु आधुनिकसंस्कृतसाहित्ये उपन्यासः न केवलं नाट्यसन्धेरङ्गं भवति परन्तु अधुना विषयमिदं नवरुपेण नवकाव्यविधारुपेण परिचीयते नास्ति तत्र कोऽपि संशयः।

## संदर्भ


1. संस्कृत वाङ्मय का वृहद् इतिहास – (7म खण्ड) आचार्य जगन्नाथ पाठक (सम्पा.), उत्तर प्रदेश संस्कृत संस्थान, लखनउ, 2000।
2. अर्वाचीन संस्कृत साहित्य: दशा एवं दिशा – डाँ. मञ्जुलता शर्मा (सम्पा.), परिमल पब्लिकेशन्स, दिल्ली, 2004।
3. आधुनिक संस्कृत काव्य परम्परा – श्री केशव मुसलगाँओकार, वाराणसी।
4. आधुनिक संस्कृत साहित्य के नये भावबोध – डाँ. मञ्जुलता शर्मा, संस्कृत ग्रन्थगार, दिल्ली-अहमदाबाद, 2010।
5. आधुनिक संस्कृत साहित्य (1910-2010) छोटगल्प ओ नाटक – डः ऋता चट्टोपाध्याय,प्रग्रेसिभ पावलिशार्स, कलकाता, 2012।
6. चन्द्रप्रभाचितम् -महामहोपाध्याय शङ्खरलाल, रमा सक्सेना(सम्पादिका) , चौखम्बा विद्याभवन, वाराणसी, 1962.
7. भारतवर्षे आधुनिकसंस्कृतसाहित्यम् :विहङ्गमदृष्ट्या परिशीलनम् – डः शुभ्रजित् सेन, संस्कृत पुस्तक भण्डार, कोलकाता, 2019।
8. सत्यहरिश्चन्द्रोदयम् – डाँ रामजी उपाध्याय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2018।
9. विंश-शताब्दी संस्कृत ग्रन्थ सूचीपत्रम् – मिश्रोइभिराज राजेन्द्रः।
10. आधुनिक संस्कृत साहित्य – डः मैत्रैयी कुमारी,ग्रन्थभारती प्रकाशन, दिल्ली, 2022।
11. आधुनिक संस्कृत साहित्येर संक्षिप्त इतिवृत्त – डः शिप्रा राय, संस्कृत वुक डिपो, कलकाता, 2017।
12. अर्वाचीन(आधुनिक) संस्कृत साहित्येर इतिहास 1801-2020 – वनविहारी घोषाल, पारुल प्रकाशनी प्राइभेट लिमिटेड, कलकाता, आगरतला।

13. द्वा सुपर्णा – प्रो. रामजी उपाध्याय, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2018।
14. आधुनिक संस्कृत काव्य की परिक्रमा -डाँ. मञ्जुलता शर्मा, राष्ट्रीयसंस्कृतसंस्थान(मानितविश्वविद्यालय), नवदेहली, 2011।
15. अर्वाचीन संस्कृत साहित्य – डाँ. राजमङ्गल यादव, जे. पी. पब्लिशिंग हाउस, दिल्ली, 2015 ।
16. अविनाशि – डाँ. विश्वनारायणशास्त्री, चौखम्बा संस्कृत प्रतिष्ठान, 1986।
17. शिवराजविजयम् – अम्बिकादत्त व्यास, चौखम्बा संस्कृत पप्रतिष्ठान, 2012।
18. Modern Sanskrit Literature Tradition and Innovations : Edited by S.B. Raghunath Acharya.
19. https://hi.m.wikipedia.org/wiki/%E0%A4%93%E0%A4%A1%E0%A4%BC%E0%A4%BF%E0%A4%AF%E0%A4%BE_%E0%A4%B8%E0%A4%BE%E0%A4%B9%E0%A4%BF%E0%A4%A4%E0%A5%8D%E0%A4%AF
20. https://archive.org/details/in.ernet.dli.2015.443848/mode/1up
21. https://en-m-wikipedia-org.translate.goog/wiki/Tamil_historical_novels?_x_tr_sl=en&_x_tr_tl=hi&_x_tr_hl=hi&_x_tr_pto=tc
22. https://hi.m.wikipedia.org/wiki/%E0%A4%B9%E0%A4%BF%E0%A4%A8%E0%A5%8D%E0%A4%A6%E0%A5%80_%E0%A4%89%E0%A4%AA%E0%A4%A8%E0%A5%8D%E0%A4%AF%E0%A4%BE%E0%A4%B8#:~:text=%E0%A4%B9%E0%A4%BF%E0%A4%82%E0%A4%A6%E0%A5%80%20%E0%A4%AE%E0%A5%87%E0%A4%82%20%E0%A4%B8%E0%A4%BE%E0%A4%AE%E0%A4%BE%E0%A4%9C%E0%A4%BF%E0%A4%95%20%E0%A4%89%E0%A4%AA%E0%A4%A8%E0%A5%8D%E0%A4%AF%E0%A4%BE%E0%A4%B8%E0%A5%8B%E0%A4%82%20%E0%A4%95%E0%A4%BE,%E0%A4%B5%E0%A4%BE%E0%A4%A4%E0%A4%BE%E0%A4%B5%E0%A4%B0%E0%A4%A3%20%E0%A4%95%E0%A4%BE%20%E0%A4%89%E0%A4%A4%E0%A5%8D%E0%A4%A4%E0%A4%AE%20%E0%A4%9A%E0%A4%BF%E0%A4%A4%E0%A5%8D%E0%A4%B0%E0%A4%A3%20%E0%A4%B9%E0%A5%88%E0%A5%A4
23. https://sanskritbhasi.blogspot.com/2014/05/blog-post_17.html?m=1
24. https://hi.unionpedia.org/%E0%A4%B9%E0%A4%B0%E0%A4%BF%E0%A4%A6%E0%A4%BE%E0%A4%B8_%E0%A4%B8%E0%A4%BF%E0%A4%A6%E0%A5%8D%E0%A4%A7%E0%A4%BE%E0%A4%82%E0%A4%A4_%E0%A4%B5%E0%A4%BE%E0%A4%97%E0%A5%80%E0%A4%B6